# SK-104 बृहदारण्यकोपनिषद् 3,4.

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

## A) यथेष्टं दशानां प्रश्नानां समाधानं लिखत। 1x10=10

1) जनको हे वैदेहः इति मन्त्रेण कस्य काण्डस्य आरम्भः भवति?
2) बृहदारण्यकोपनिषत् केन वेदेन सह सम्बद्धा वर्तते?
3) मधुकाण्डं किं प्रधानम्?
4) उपपत्तिप्रधानं काण्डं किम्?
5) विद्वद्भिः शास्त्रेषु दृष्टः उपायः कः?
6) विद्याप्रप्त्युपाये दानातिरिक्तं उपायान्तरं किम्?
7) प्रत्यक्षा च विद्वत्संयोगे.....। पूरयत।
8) बहुदक्षिणाकः यागः कः?
9) पलचतुर्थभागः सुवर्णस्य कतमः भागः?
10) ब्रह्मिष्ठपणस्वीकारः केन जनकसभायां कृतः आसीत्?
11) जनकस्य होता कः?
12) यजमानस्य मृत्योरत्ययः मधुकाण्डे केन कर्मणा व्याख्यातः?

## B) यथेष्टं पञ्चानां समाधानं कुरुत। 3x5=15

1) जनकसभायां विद्याप्राप्त्युपायः कः इति विचारितः?
2) याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्युनाप्तं इत्यादि मन्त्रार्थं विषदयत।
3) कालादतिमुक्तिं व्याख्यात?
4) पूर्वापरपक्षलक्षणात् तिथ्यादिलक्षणात् च कालादतिमुक्तिं व्याख्यात।
5) याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होता इत्यादि मन्त्रार्थं विषदयत।
6) देवलोकपितृलोकयोः प्रापिकाः आहूतयः इति सप्रसंगं व्याख्यात।
7) याज्ञवल्कीयकाण्डस्योपपत्तिप्रधानतां दर्शयत।

C) **यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1) भुज्युब्राह्मणदिशा पारिक्षितानां गतिविचारं प्रतिपादयत।
2) उषस्तब्राह्मणसारं लिखत।
3) कहोलब्राह्मणसारं संगृह्णीत।
4) बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः इत्यादिश्रुतिवाक्यं सप्रसंगं व्याख्यात।
5) व्युत्थायाथ भिक्षाचर्यं चरन्ति इत्यादि श्रुतिवाक्यं व्याख्यात ।

D) **एकस्योत्तरं लिखत।** **10x1=10**

1) ग्रहातिग्रहस्वरूपं मृत्युं व्याख्याय, विद्वत्पुरुषस्य प्राणादयः उत्क्रामन्ति आहोस्विन्न इति परामृशत।
2) बृहदारण्यकोपनिषदः तृतीयाध्यायस्य पंचमषष्ठब्राह्मणयोः संगतिं व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-105

## SK-105 तैत्तिरीयोपनिषत् शाङ्करभाष्योपेता।

कालावधिः - होराद्वयम् पूर्णाङ्काः – 50

---

### A) यथाकामं दश प्रश्नान् उत्तरत। 1x10=10

1) ब्रह्मलक्षणे ज्ञानपदस्य किं निर्वचनम्।
2) ऐकभवीयमोक्षे कति पूर्वपक्षकोटयः सन्ति।
3) "तस्माद्वा एतस्मात्" इत्यत्र तत्पदवाच्यः कः।
4) "शीक्षाम्" इति शब्दप्रयोगः कीदृशः।
5) शिक्षा इति शब्दस्य व्युत्पत्तिः का।
6) मह इति व्याहृतेः प्रवर्तकः कः।
7) हृदयादूर्ध्वं प्रवृत्ता नाडी का।
8) सत्यस्य लक्षणं किम्।
9) पितृदेवो भव इत्यस्य कः अर्थः।
10) कियद्गुणविशिष्टा पृथिवी उत्पद्यते।
11) आनन्दमयः कः।

### B) यथारुचि पञ्च उत्तरत। 3x5=15

1) ब्रह्मवल्ल्याः पञ्चमानुवाके आनन्दमयाधिकरणं कथं प्रसक्तम्।
2) यतो वाचो निवर्तन्ते इति व्याख्यात।
3) प्रजातन्तुं मा व्यवच्छेत्सीः इति मन्त्रभागस्य भाष्याशयं लिखत।
4) ब्रह्मविदाप्नोति परं इति वाक्यस्य समग्रवल्यर्थसारत्वं कथम्।
5) अभयप्रतिष्ठा किमर्थम् प्रस्तूयते।

### C) यथाच्छन्दं सभाष्यं च त्रीन् व्याख्यात। 5x3=15

1) ब्रह्मणः त्रिविधपरिच्छेदशून्यत्वं भाष्यदिशा वर्णयत।
2) इषेत्वोर्जेत्वा इत्यत्र पूर्वोत्तरादिरूपं वर्णयत।
3) ऐकभवीयं मोक्षं निरूपयत।

4) ब्रह्मणः तटस्थलक्षणं, ससूत्रं, सभाष्यं व्याख्यात।

D) **अनुप्रियमेकम् व्याख्यात।** **10x1=10**

1) सत्यं ज्ञानमनन्तं ब्रह्म इत्यत्र ज्ञानशब्दव्युत्पत्तिविचारं वर्णयत।

2) संक्रमणश्रुतिविचारः उपस्थाप्यताम्।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-106

# **SK-106 माण्डूक्योपनिषद्भाष्यम्**

समयः होराद्वयम् पूर्णाङ्कः ५०

---

A) वाक्येन वाक्याभ्यां वा उत्तरत। 1x10=10

1) चतुष्पात् कः?
2) ओङ्कारनिर्णयाय कतमं प्रकरणम् आरभ्यते?
3) माण्डूक्योपनिषदि श्रूयमाणं महावाक्यं किम्?
4) स्थूलभुक् इत्यनेन कस्य निर्देशः श्रुत्या क्रियते?
5) दक्षिणाक्षिमुखे कः अनुभूयते?
6) ओङ्कारस्य कति मात्राः वर्तन्ते?
7) अमात्रश्चतुर्थः कः?
8) वैतथ्यप्रकरणं किमर्थमारभ्यते?
9) स्वाप्नपदार्थानां वैतथ्ये को हेतुः?
10) स्वप्नदृश्याः पदार्थाः वितथा इत्यत्र प्रमाणभूता श्रुतिः का?
11) प्रविविक्तभुक् तैजसः कः?
12) नाप्रज्ञमित्यत्र कस्य प्रतिषेधः अभिप्रेतः?

B) **यथाग्रन्थं सप्रमाणं व्याख्यात।** **3x5=15**

1) एष सर्वेश्वर एष सर्वज्ञः एषोऽन्तर्यामी...।
2) अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः ...।
3) वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः।
4) अभावश्च रथादीनां श्रूयते न्यायपूर्वकम्।
5) ज्ञानेनाऽऽकाशकल्पेन धर्मान् यो गगनोपमान्।
6) अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः।
7) सांसिद्धिकी स्वाभाविकी सहजा अकृता च या।
8) तस्मान्न जायते चित्तं चित्तदृश्यं न जायते।

C) **यथाग्रन्थं सप्रमाणं व्याख्यात।** **5x3=15**

1) जाग्रदाद्यवस्थानां निरूपणं यथाभाष्यं कुरु।

2) ओङ्कारस्य मात्राणाम् आत्मनश्च पादानां तादात्म्यं वर्णयत।

3) स्वाप्नपदार्थाः वितथा इति साधयत।

4) अलातशान्तिप्रकरणदिशा प्रपञ्चस्य सत्यत्वं निराकृत्य चित्ताख्यस्य ब्रह्मणः स्वरूपं वर्णयत।

5) मङ्गलपद्यद्वयं सव्याख्यानं व्याख्यात।

D) **ग्रन्थोक्तदिशा लघूपन्यासं कुरुत।** **10x1=10**

1) आगमप्रकरणस्य तात्पर्यं संक्षिपत।

2) तुरीयस्य स्वरूपं सप्रमाणं वर्णयत।

***

RKMVERI/DSP/MAIS/17-22/J2021/SK-107

**SK-107 केनोपनिषद् ऐतरेयोपनिषच्च शांकरभाष्योपेते**

कालावधिः- होराद्वयम् पूर्णाङ्कः-50

---

A) **नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत।** **1×10=10**

1) केनोपनिषत् कस्मिन् वेदे श्रूयते ?
2) कस्य समीपे न चक्षुः गच्छति न वाग्गच्छति ?
3) दभ्रम् इति शब्दस्य कोऽर्थः?
4) बोधशब्देन काः उच्यन्ते ?
5) केनोपनिषदः तृतीयखण्डे आख्यायिका किमर्थम् आरभ्यते ?
6) केषां मिथ्याभिमानः आसीत् ?
7) केनेपोनिषदि कति मन्त्राः वर्तन्ते ?
8) ऐतरोयोपनिषदि कति अध्यायाः वर्तन्ते ?
9) सृष्टेः प्राक् एक एव क आसीत् ?
10) लोकपालानां सृष्टिः किमर्थम् ?
11) प्रज्ञानं ब्रह्म इति महावाक्यं कुत्र विद्यते ?
12) गर्भावस्थायामेव कः महर्षिः मुक्त इति उपनिषत् कथयति ?

B) **निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम् ।** **3x5=15**

1) केनेषितं पतति प्रेषितं मन इति मन्त्रं लिखित्त्वा सामान्यार्थं प्रदर्शयत
2) ऐतरेयोपनिषत् शान्तिमन्त्रं लिखत ।
3) सद्गुरु-उपदेशात् एव ज्ञानमिति सप्रमाणं विवृणुत ।
4) इहैव मुक्तिरिति प्रमाणीभूतं केनोपनिषत् मन्त्रं लिखत ।
5) केनोपनिषदः तृतीयखण्डः किमर्थम् आरभ्यते इति विवेचयत ।
6) ओम आत्मा वा इदमेक एवाग्र आसीत् इति मन्त्रं सम्पूर्णं लिखित्त्वा भावार्थं प्रदर्शयत ।

C) **अत्र त्रयः प्रश्नाः समाधेयाः** **5x3=15**

1) एषणात्यागेन अमृतत्त्वप्राप्तिरिति केनोपनिषदनुसारं वर्णयत ।
2) प्रतिबोधविदितं मतम् इति मन्त्रांशं सविस्तारं चर्चयत ।
3) देवतानां आख्यायिकां यथा क्रमं प्रपञ्चयत ।
4) ऐतरेयोपनिषदः प्रथमखण्डस्य प्रथम, द्वितीय मन्त्रं सभाष्यं व्याख्यात
5) ऐतरेयोपनिषदि लोकपालानां सृष्टिप्रक्रियां प्रदर्शयत ।

D) **अघस्ताद् अनुप्रियमेकं विस्तारेण लिखत ।** **1x10=10**

1) केनोपनिषदौचित्यं सविस्तारं विमर्शयत ।
2) केनोपनिषदः तृतीय खण्डस्य सारांशं लिखत ।
3) ऐतरेयोपनिषदन्तर्गत-सृष्टिप्रक्रियां वर्णयत ।

***

## SK-126 भगवद्गीता सशाङ्करभाष्या(13,15,18)

समयः होराद्वयम् पूर्णाङ्कः ५०

---

**A) एकेन वाक्येन पदेन वा उत्तरत। 1x10=10**

1) आदित्यगतं तेजः कस्य?
2) प्रकृतिः किमर्थं देहेन्द्रियाद्याकारेण संहन्यते?
3) कृषिः कस्य स्वभावजं कृति?
4) किं क्षेत्रमभिधीयते?
5) देहसंघाते कुत्र ईश्वरः उपलभ्यते?
6) कः क्षरः पुरुषः?
7) कवयः कं सन्न्यासं विदुः?
8) किं कृत्वा मां शरणं व्रज इत्युक्तम्?
9) गीताश्रवणेन अर्जुनस्य को नष्टः का च लब्धा?
10) परमज्ञेयं कथम् अविज्ञेयं भवति?
11) सर्वकर्मसिद्धेः पञ्च कारणानि कानि?
12) केन नयेन चातुर्वर्ण्यं विभक्तम्?

**B) समासेन पञ्च विवृणुत। 3x5=15**

1) ध्यानेनात्मनि पश्यन्ति....
2) न हि देहभृता शक्यम्....
3) ममैवांशो जीवलोके....
4) उपद्रष्टानुमन्ता च....
5) सर्वभूतेषु येनैकं....
6) न रूपमस्येह....
7) ईश्वरः सर्वभूतानाम्....
8) अनादित्वान्निर्गुणत्वात्...

C) **त्रीणि विशदयत।** **5x3=15**

1) संसाराश्वत्थं वर्णयत।

2) क्षेत्रक्षेत्रज्ञसंयोगात् स्थावरजङ्गमोत्पत्तिं भाष्यदिशा विस्तारयत।

3) चातुर्वर्ण्यस्य कर्मविभागं निरूपयत।

4) सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते, भाष्यदिशा व्याख्यात।

5) उपसंहारभाष्यदिशा ज्ञानं निःश्रेयससाधनमिति साधयत।

D) **एकं प्रपञ्चयत।** **10x1=10**

1) अमानित्वादिज्ञानसाधनगणं विशदयत।

2) क्षेत्रज्ञं चापि मां विद्धि, प्रपञ्चयत।

***

RKMVERI/DSP/MAIS/18-23/J2021/SK-131

## SK-131 ब्रह्मसूत्रभाष्यम् (१-१,२)

कालावधिः - होराद्वयम् पूर्णांकाः - 50

---

A) **यथेष्टं दशानां प्रश्नानां समाधानं लिखत।** **1x10=10**

1) अध्यासलक्षणं किम्?
2) जिज्ञासासूत्रे अथपदस्य कोर्थः?
3) जन्मादिसूत्रे यतः पदेन कस्य निर्देशः कृतः ?
4) शास्त्रयोनित्वादित्यत्र विग्रहः कथम्?
5) ईक्षतेर्नाशब्दमित्यत्र अशब्दं किम्?
6) आकाशस्तल्लिंगादित्यत्र विषयवाक्यं किम्?
7) प्राणस्तथानुगमात् इति सूत्रे विषयवाक्यं किम्?
8) शास्त्रदृष्ट्या उपदेशः किंवत्?
9) स्वाप्ययादिति सूत्रार्थं लिखत।
10) अन्तरधिकरणे विषयवाक्यं किम्?
11) अत्ता परमात्मा एव, कस्मात्?
12) जन्माद्यधिकरणे विषयवाक्यं किम्?

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) अध्यासस्वरूपं व्याख्यात।
2) जिज्ञासासूत्रस्थमतः शब्दार्थं विचारयत।
3) ब्रह्मजिज्ञासा पदे समासं विचारयत।
4) जन्मादि इत्यत्र कुतः षड्भावविकाराः न गृह्यन्ते, व्याख्यात।
5) शास्त्रयोनित्वाधिकरणदिशा ब्रह्मणः शास्त्रकारणत्वं व्याख्यात।
6) गौणश्चेन्नात्मशब्दात् इति सूत्रार्थं विवृणुत।
7) हेयत्वावचनाच्च इति सूत्रं यथाभाष्यं व्याख्यात।

C) **यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1) ईक्षतेर्नाशब्दमिति सूत्रार्थं यथाभाष्यं वर्णयत।
2) अन्तरधिकरणसारं लिखत।
3) आकाशाधिकरणसारं व्याख्यात।
4) प्राणाधिकरणं निरूपयत।
5) ज्योतिश्चरणाधिकरणार्थं व्याख्यात।

D) **एकस्योत्तरं लिखत।** **10x1=10**

1) प्रातर्दनाधिकरणसारं लिखत।
2) सर्वत्रप्रसिद्ध्यधिकरणसारं व्याख्यात।

***

RKMVERI/DSP/MAIS/17-22/J2021/SK-134

# SK-134 ब्रह्मसूत्रशाङ्करभाष्यम्

कालः - होराद्वयम् अङ्कः - 50

---

A) **वाक्येन वाक्याभ्यां वा उत्तरत।** **1x10=10**

1) द्वितीयाध्यायस्य चतुर्थपादस्य विषयः कः?
2) प्राणानां संख्याविषयः श्रुतिविप्रतिषेधः कस्मिन्नधिकरणे परिहृतः?
3) प्राणानाम् अणुत्वं नाम कोऽर्थः?
4) प्राणस्य पञ्च वृत्तयः काः?
5) "तस्य च नित्यत्वात्" इत्यत्र कस्य नित्यत्वं साध्यते?
6) तृतीयाध्यायस्य प्रथमपादे किं प्रदर्श्यते?
7) प्राणानां देहान्तरप्रतिपत्तौ गतिबोधकं वाक्यं किम्?
8) कृतात्ययाधिकरणस्य विषयवाक्यं किम्?
9) कार्ष्णाजिनिमते किमर्था चरणश्रुतिः?
10) "अपि च सप्त" इति सूत्रार्थः कः?
11) साभाव्यापत्त्यधिकरणस्य पूर्वपक्षः कः?

B) **यथाग्रन्थं सप्रमाणं व्याख्यात।** **3x5=15**

1) ज्योतिराद्यधिष्ठानं तु तदामननात्।
2) न वायुक्रिये पृथगुपदेशात्।
3) अणवश्च।
4) नातिचिरेण विशेषात्।
5) प्राणगतेश्च।
6) विद्याकर्मणोरिति तु प्रकृतत्वात्।
7) सुकृतदुष्कृते एवेति तु बादरिः।

C) **अधिकरणतात्पर्यं वर्णयत।** **5x3=15**

1) प्राणोत्पत्त्यधिकरणम्।
2) वायुक्रियाधिकरणम्।
3) इन्द्रियाधिकरणम्।
4) अनिष्टादिकार्यधिकरणम्।
5) कृतात्ययाधिकरणम्।

D) **ग्रन्थोक्तदिशा लघून्यासं कुरुत ।** **10x1=10**

1) संज्ञामूर्तिक्लृप्त्यधिकरणमाश्रित्य नामरूपव्याकरणकर्तृत्वविचारं निरूपयत।
2) तदन्तरप्रतिपत्त्यधिकरणदिशा भूतसूक्ष्मसंपरिष्वक्तस्य जीवस्य उत्क्रमणमिति वर्णयत।

***

RKMVERI/DSP/MAIS/15/072021/SK-136

**SK-136 ब्रह्मसूत्रशांकरभाष्यम् (३.४पादः, ४ अध्यायश्च)**

कालावधिः - होराद्वयम् पूर्णाङ्काः – 50

---

A) **यथेष्टं दशानां प्रश्नानां समाधानं लिखत।** **1x10=10**

1) मोक्षोत्तरं शरीरं भवति इति कस्य मतम्?
2) चतुर्थाध्यायस्य चतुर्थपादस्य नाम किम्?
3) अनावृत्तिशब्दादनावृत्तिशब्दात् इति सूत्रार्थं लिखत।
4) उपासकस्य कार्यब्रह्म प्रति उपासको गच्छति कस्य मतम्।
5) तदेकोग्रज्वलनम् ------- सूत्रं पूरयत।
6) हार्दशब्दस्य कः अभिप्रायः।
7) तानि परे तथा ह्याह इति सूत्रं कस्य अधिकरणस्य।
8) उपासकस्य इन्द्रियादीनां कुत्र लयः।
9) विद्युत्लोकानन्तरं कः लोकः वर्तते।
10) जीवात्मनः कस्याः नाड्याः उत्क्रमणं भवति।
11) कीदृशं कर्म मोक्षाय स्यात्।
12) कर्मणः मोक्षप्रतिपादिका श्रुतिः का।

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) रश्यम्यधिकरणं लिखत।
2) अभावाधिकरणसारं लिखत।
3) लोकोत्तरगमने के साहायकाः भवन्ति  इति ससूत्रं व्याख्यात।
4) विदुषः ब्रह्मप्राप्त्यनन्तरं सर्वज्ञत्वसर्वेश्वरत्वरूपेण अवस्थितिः भवति वा न वा इति विवेचयत।
5) प्रेतस्य उत्तरायणादिकानुगुणम् अस्ति वा न वा इति व्याख्यात।
6) सोध्यक्षे तदुपगमादिभ्यः इति सूत्रार्थं यथाभाष्यं व्याख्यात।
7) यावत्फलप्रात्यावृतिः करणीया उत न इति विवेचयत

C) **यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1) त्रयो धर्मस्कन्धाः इति श्रुतिं यथासूत्रं यथाभाष्यं सप्रसंगं व्याख्यात।

2) यदि नैष्ठिको ब्रह्मचारी प्रमादादवकीर्यते किं तस्य फलं स्यात् इति विवेचयत।

3) आश्रमकर्माधिकरणार्थं यथाभाष्यं प्रतिपादयत।

4) पञ्चाङ्गयुक्तमेकमहिकरणम् आरचयत।

D) **एकस्योत्तरं लिखत।** **10x1=10**

1) आवृत्यधिकरणसारं लिखत।

2) पुरुषार्थाधिकरणसारं विवृणुत।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-137

## SK-137 संक्षेपशारीरकम्

कालावधिः - होराद्वयम् पूर्णांकाः -50

---

A) **यथेष्टं दशानां प्रश्नानां समाधानं लिखत।** **1x10=10**

1) अनृतजडेत्यादि श्लोके अन्यत्रही किम्?
2) जगत् जीवेश्वरभेदाः कस्मात् कथं वा कल्पिताः सन्ति।
3) अच्युतस्य परमार्थनिजस्वभावः कः?
4) विश्वहिते रतः कः विजयते?
5) मंगलश्लोकेषु व्यासः केन उपमितः?
6) निरस्तदुस्तर्ककलंकपंका का?
7) वयं कृतार्था निरवद्यकीर्तयः इति वचनार्थः कः?
8) कस्मात् कारणात् ग्रन्थकारः आत्मानं निरन्तरायं चिन्तयति?
9) पण्डितजना किं निमित्ततया प्रथिताः सन्ति?
10) विद्वन्मन्यस्य दोषकीर्तनं ग्रन्थकारः कथं चिन्तयति?
11) विवस्वतो मण्डलं हस्ततलेन कः आच्छादयितुं प्रवर्तते इव?
12) वेदशिरसो वचनात् स्वयमेव कीदृशी बुद्धिरुद्भवति?

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) अनृतजडविरोधिरूपमित्यादि शलोकार्थं व्याख्यात।
2) प्रत्यक्चितिर्विजयते भुवनैकयोनिः व्याख्यात।
3) औत्पत्तिकी शक्तिरशेषवस्तु इत्यादि श्लोकं निरूपयत।
4) व्यासनमस्कारात्मकं मंगलश्लोकं व्याख्यात।
5) नमामि तं शंकरमर्चिताङ्घ्रिमिति श्लोकपादार्थं सप्रसंगं व्याख्यात।
6) जयन्ति देवेश्वरपादरेणवः सप्रसंगं व्याख्यात।
7) आच्छाद्यविक्षिपतिसंस्फुरदात्

C) **यथेष्टं त्रयाणां श्लोकानामर्थं लिखत।** **5x3=15**

1) व्युत्पन्नस्य हि बुद्धिजन्म सहसा.....
2) प्रत्यक्त्वमात्रविषयाश्रयताबले
3) प्रत्यक्षलिंगवचनानि हि दर्शयन्ति.....
4) आनन्दविग्रहमपास्तसमस्तदुःखं...
5) सादृश्यधीप्रभृति न त्रितयं निमित्तम्.....

D) **एकस्योत्तरं लिखत।** **10x1=10**

1) आत्मनः सच्चिदानन्दरूपतां प्रत्यक्षानुमानागमैः साधयत।
2) संक्षेपशारीरकारस्य वेदान्तव्याख्यानकौशलं गमयत।

***

## SK-141 चतुस्सूत्री (भामतीसहिता)

समयः- होराद्वयम् पूर्णाङ्कः - 50

---

A) **यथेष्टं दशानां प्रश्नानां समाधानं लिखत।** **1x10=10**

1) वियदनिलतेजोबवनयः कस्य विवर्ताः?
2) भामत्याः मंगलश्लोके ब्रह्मणः लक्षणद्वयं वर्णितं तत् किम्?
3) वेदाः कुतः उत्पन्नाः?
4) ब्रह्मणः स्वापः किमिति उच्यते?
5) वेदस्य षडङ्गानि कानि?
6) ब्रह्मसूत्रकृत् कः?
7) शांकरभाष्यं भामतीकारदृष्ट्या कथमस्ति?
8) प्रेक्षावत्प्रतिपित्सागोचरं किं न भवति?
9) व्यापकविरुद्धोपलब्धिरित्यत्र व्यापकपदेन कयोर्ग्रहणं भवति?
10) "आत्मैव ब्रह्म" इति कस्मात् गीयते?
11) "येषु व्यावर्तमानेषु............सूत्
12) विषयाः इति पदस्यार्थं भामतीदिशा लिखत।

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) मार्तण्डतिलकस्वामीन् इत्यादि श्लोकार्थं वर्णयत।
2) वेदस्य भवस्य च षडङ्गानि लिखत।
3) ब्रह्मसूत्रकृते तस्मै इति श्लोकार्थं वर्णयत।
4) पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् इति सूत्रार्थं व्याख्यात।
5) गौणः कः इति भामतीदिशा वर्णयत।
6) अध्यासलक्षणस्थपदानामर्थं वर्णयत।
7) स्वरूपपररूपाभ्यामिति कारिकार्थं व्याख्यात।

C) **यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1) अध्यासलक्षणं भामतीदिशा व्याख्यात।
2) आत्मनः अस्मत्प्रत्ययविषयत्वं वर्णयत।
3) अध्यासानुपपत्तिं व्याख्यात।
4) आत्मख्यातिवादं निरूपयत।
5) अख्यातिवादं भामतीदिशा विवृणुत।

D) **एकस्योत्तरं लिखत।** **10x1=10**

1) भामतीदिशा जन्माद्यधिकरणमालोचयत।
2) भामत्यनुसारमध्यासोपपत्तिं वर्णयत।

***

RKMVERI/DSP/MAIS/19-24/J2021/SK-161

# SK-161 वेदान्तसारः

कालावधिः - होराद्वयम् पूर्णांकाः - 50

---

**A) यथेष्टं दशानां प्रश्नानां समाधानं लिखत। 1x10=10**

1) वेदान्तसारकर्ता कः?
2) वेदान्तो नाम किम्?
3) अनुबन्धाः के?
4) प्रमातृलक्षणं किम्?
5) शमो नाम कः?
6) दमो नाम कः?
7) तितिक्षा का?
8) श्रद्धा का?
9) बुद्धेर्लक्षणं किम्?
10) मनसः लक्षणं किम्?
11) विकारो नाम कः?
12) विवर्तः नाम किम्?

**B) यथेष्टं पञ्चानां समाधानं कुरुत। 3x5=15**

1) मंगलश्लोकान् व्याख्यात।
2) अनुबन्धचतुष्टयं लिखत।
3) कर्मणः षड्भेदान् निरूपयत।
4) साधनचतुष्टयं किमिति विचारयत।
5) प्राणमयकोशस्वरूपं व्याख्यात।
6) अध्यारोपापवादयोः स्वरूपं सलक्षणं प्रतिपादयत।
7) विज्ञानमयकोशस्वरूपं गमयत।

C) **यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1) सृष्टिक्रमं निरूपयत।
2) सूक्ष्मशरीरस्वरूपमादर्शयत।
3) जीवात्मनः विषयकान् मतभेदान् लिखत।
4) तात्पर्यनिर्णायिकलिंगानि सप्रसंगं निरूपयत।
5) पंचीकरणप्रक्रियां व्याख्यात।

D) **एकस्योत्तरं लिखत।** **10x1=10**

1) अधिकारिणः स्वरूपं लक्षणं च वेदान्तसारोक्तदिशा व्याख्यात।
2) समाधिस्वरूपं, मुक्तिलक्षणं, मुक्तलक्षणं च वेदान्तसारदिशा व्याख्यात।

***

RKMVERI/DSP/MAIS/18-23/J2021/SK-163

## SK-163 वेदान्तपरिभाषा-I

कालः - होराद्वयम्　　　　　　　　　　　　　　　　　　　　　　　　　अङ्कः - 50

---

A) **वाक्येन वाक्याभ्यां वा उत्तरत।** **1x10=10**

1) घटादीनां बाधः कदा इष्यते?
2) कति प्रमाणानि? कानि तानि?
3) चैतन्यं कथम् आदिमदिति उच्यते?
4) मनसोऽनिन्द्रियत्वे श्रुतिप्रमाणं किम्?
5) सिद्धान्ते ज्ञानगतप्रत्यक्षप्रयोजकं किम्?
6) शब्दादपि अपरोक्षज्ञानाभ्युपगमः कुत्र सम्भवति?
7) आगमशब्दस्य का व्युत्पत्तिः?
8) पदार्थस्य कति भेदाः? के च ते?
9) लक्षणायाः बीजं किम्?
10) जहदजहल्लक्षणायाः उदाहरणं किम्?
11) “सा वैश्वदेव्यामिक्षा” इति श्रुतौ कस्य आकांक्षानिवृत्तिः?

B) **यथाग्रन्थं सप्रमाणं व्याख्यात।** 3x5=15

1) प्रत्यक्षप्रमा।
2) कामादेरपि मनोधर्मत्वम्।
3) मोक्ष एव परमपुरुषार्थः।
4) योग्यता।
5) लक्षणा च द्विविधा।
6) तत्त्वमसि।

C) **अधिकरणतात्पर्यं वर्णयत।** 5x3=15

1) प्रमालक्षणं व्याख्यात।

2) ज्ञानगतप्रत्यक्षस्य लक्षणं यथाग्रन्थमुपपादयत।

3) प्रत्यक्षप्रमा च चैतन्यमेव इति यथाग्रन्थं व्याख्यात।

4) तात्पर्यज्ञानस्य समासे कुतो न प्रवेशः।

5) तत्त्वमस्यादिवाक्ये कथं मुख्या वृत्तिः?

6) शक्यपदार्थं निरूपयत।

D) **ग्रन्थोक्तदिशा लघूपन्यासं कुरुत ।** 10x1=10

1) आकांक्षालक्षणे योग्यतावच्छेदकविचारं विशदयत।

2) ज्ञानगतविषयगतप्रत्यक्षभेदविचारं व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-173

# SK-173 अद्वैतसिद्धिः-II

कालः - होराद्वयम् अङ्कः - 50

---

A) **वाक्येन वाक्याभ्यां वा उत्तरत।** **1x10=10**

1) नीलपीताद्यनन्ताधिष्ठानकल्पने को दोषः?
2) मिथ्या रूप्यमित्यत्र मिथ्यात्वस्य अधिष्ठानत्वशङ्कापि नास्ति, कुतः?
3) सन् घटः इत्यत्र सामानाधिकरण्यस्य सत्ताजातिस्फुरणनिबन्धनत्वे कः दोषः?
4) विजातीयसम्बन्धेन समानाकारप्रतीत्यनुपपत्तेः कुतः?
5) नापि कालत्रयाबाध्यत्वनिबन्धनं सामानाधिकरण्यं, कुतः?
6) अपच्छेदन्यायेन कस्य प्राबल्यं साध्यते?
7) प्रतिहर्त्रपच्छेदस्य किं प्रायश्चित्तम्?
8) “तस्य प्रयोगान्तरे निक्षेपः” कुत्रोक्तमिदम्?
9) अपच्छेदन्यायः सावकाशविषय इति कस्य मतम्?
10) तत्परत्वात् इत्यत्र सिद्धान्ते परशब्देन किं विवक्षितम्?
11) प्रत्यक्षादेः कीदृशं प्रामाण्यम्?

B) **यथाग्रन्थं सप्रमाणं व्याख्यात।** **5x6=30**

1) सन्नित्यस्य घटः इत्यनेन सामानाधिकरण्यस्य बाधितत्वात्।
2) नापि कालत्रयाबाध्यत्वनिबन्धनं तत्।
3) अधिष्ठेयविषमसत्ताकमेव ह्यधिष्ठानं भवति।
4) “पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्”।
5) तथा इहाप्युदीच्यागमेन पूर्वस्य प्रत्यक्षस्य बाधः।
6) “तत्परत्वात् परत्वाच्च निर्दोषत्वाच्च वैदिकम्”।
7) तस्मादपच्छेदन्यायः सावकाशविषयः।

C) **ग्रन्थोक्तदिशा लघूपन्यासं कुरुत ।** **10x1=10**

1) अपच्छेदन्यायमाश्रित्य अद्वैतागमस्य प्रत्यक्षबाधकत्वं निरूपयत।

2) "सन् घटः" इत्यत्र अधिष्ठानानुवेधप्रकारं वर्णयत।

***

# SK-213 समासप्रकरणम्।

समयः- होराद्वयम् पूर्णाङ्कः - 50

---

A) **दशप्रश्नाः समाधेयाः।** **1x10 =10**

1) भूतपूर्वः इत्यत्र भूतशब्दस्य पूर्वनिपातः कथम्?
2) उपशरद् इत्यत्र कः समासान्तः प्रत्ययः अस्ति?
3) यथाशक्तिः इत्यस्य कः अर्थः?
4) कथं द्विगुश्च इति सूत्रं त्यक्तुं शक्यम् आसीत्?
5) गिरेश्च सेनकस्य इति सूत्रे सेनकग्रहणं किमर्थम्?
6) किं नाम अधिकार्थवचनम्?
7) रन्धनाय स्थाली इत्यत्र कुतो न चतुर्थीसमासः?
8) कस्मिन् अर्थे अर्धशब्दः नित्यं क्लीबे समस्यते?
9) अरण्येतिलकाः इति कथं नित्यसमासः?
10) तत्पुरुषसमासविधायकं शास्त्रं किम्?
11) चार्थाः के?
12) दम्पती इत्यस्य लौकिकविग्रहवाक्यं लिखत।
13) के क्षुद्रजन्तवः?

B) **पञ्च प्रश्नाः लेख्याः** **3x5= 15**

1) पङ्क्तिं व्याख्यात - अनित्योऽयं गुणेन निषेधः।
2) कर्मणि च इति सूत्रं व्याख्यात
3) चतुर्थी तदर्थार्थबलिहित.... इति सूत्रे तदर्थेन प्रकृतिविकृतिभावः एव कथं ग्राह्यम्?
4) उपकृष्णम् इति रूपं साधय।
5) गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः परिभाषां व्याख्यात।
6) मित्रावरुणौ इति रूपं साधय।

7) मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वन्दः.... इति पङ्क्तिं व्याख्यात।

C) **त्रयः समाधेयाः।** **5x3= 15**

1) समर्थः पदविधिः इति सूत्रं व्याख्यात।

2) कथं पारेगङ्गात्, गङ्गापारात्, गङ्गायाः पारात् वेति।

3) चार्थे द्वन्द्वः इति सूत्रं व्याख्यात

4) स्त्रियाः पुंवत्भाषितपुंस्कात्.... इति सूत्रं सोदाहरणं व्याख्यात।

5) कर्तृकरणे कृता बहुलम् इति सूत्रं व्याख्यात।

D) **एकं समाधत्त।** **10x1= 10**

1) द्वन्दे एकवद्भावविधयकानि सूत्राणि व्याख्यात।

2) उपपदसंज्ञां विलिख्य उपपदतत्पुरुषसमासं व्याख्यात।

***

RKMVERI/DSP/MAIS/17-22/J2021/SK-216

# SK-216 सिद्धान्तकौमुद्यां तद्धितप्रकरणे प्राग्वहतीयं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथाकामं दश प्रश्नान् उत्तरत।** **1x10=10**

1) कैदार्यमित्यत्र कः तद्धितः, केन।
2) सिति च इति सूत्रस्य एकमुदाहरणं दीयताम्।
3) द्रुमः इत्यत्र केन सूत्रेण कः तद्धितः।
4) णिनिप्रत्ययान्तः हारीशब्दः कस्मिन्नर्थे।
5) शेषे इत्यस्य कोऽर्थः।
6) राष्ट्रावारपाराद्घखौ इति सूत्रार्थं लिखत।
7) कुमुद्वान् इति रूपं कथं भवति।
8) दीर्घाच्च वरुणस्य इति सूत्रार्थं लिखत।
9) गोत्रसंज्ञाविधायकं सूत्रं लिखत।
10) वैयासकिः इत्यत्र केन ऐजागमः।
11) मनुष्यः इत्यत्र कः प्रत्ययः, कश्चागमः।
12) समर्थानां प्रथमाद्वा इत्यत्र कीदृशं सामर्थ्यम्।

B) **यथारुचि पञ्च समाधत्त।** **3x5=15**

1) न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् इति सूत्रं व्याख्यात।
2) गर्गादिभ्यो यञ् इति सूत्रं व्याख्यात।
3) तस्य विकारः इति सूत्रं व्याख्यात।
4) छत्रादिभ्यो णः इति सूत्रं व्याख्यात।
5) कालाट्ठञ् इति सूत्रं व्याख्यात।
6) तसौ मत्वर्थे इति सूत्रं व्याख्यात।
7) यञञोश्च इति सूत्रं व्याख्यात।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) राष्ट्रावारपाराद्धखौ इति सूत्रं व्याख्यात।
2) मातुरुत्संख्यासम्भद्रपूर्वायाः इति सूत्रं व्याख्यात।
3) आपत्यस्य च तद्धितेऽनाति इति सूत्रं व्याख्यात।
4) मादुपधायाश्च मतोर्वोऽयवादिभ्यः इति सूत्रं व्याख्यात।
5) प्राणिस्थादातो लजन्यतरस्याम् इति सूत्रं विस्तरेण व्याख्यात।

D) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) चातुरर्थिकप्रकरणस्य चत्वारः अर्थाः विस्तरेण व्याख्येयाः।
2) समर्थानां प्रथमाद्वा इति सूत्रं विस्तरेण व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-218

# SK-218 वैयाकरणसिद्धान्तकौमुद्यां तद्धितप्रकरणे प्राग्घितीयाद्द्विरुक्तं यावत्।

समयः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथेच्छं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) त्रयम् इत्यत्र कः विग्रहः?
2) 'अपूपमयः' इत्यत्र केन सूत्रेण मयट्?
3) प्रासङ्ग्यः कः?
4) माहाजनिकः इत्यत्र ठञ्प्रत्ययः केन सूत्रेण विधीयते?
5) केशाः सन्ति अस्य अस्मिन् वेति विग्रहे कति रूपाणि, कानि च तानि?
6) इद् गोण्या इति सूत्रार्थं लिखत।
7) वाचालः इत्यत्र कस्मिन्नर्थे केन प्रत्ययविधानम्?
8) आढ्यचरः इत्यत्र केन सूत्रेण कः प्रत्ययः विधीयते?
9) कालादिति सूत्रं कीदृशम्?
10) दक्षिणाहि इत्यत्र आहिप्रत्ययः केन सूत्रेण?
11) तावतिकः इत्यत्र इट् केन शास्त्रेण?
12) इदानीमिति रूपं केन सूत्रेण भवति।

B) **यथेच्छं पञ्च प्रश्नान् उत्तरत।** **3x5=15**

1) तुरीयः इति रूपं साधयत।
2) एकादशम् इति रूपं साधयत।
3) विदुष्मान् इति रूपं साधयत।
4) तेन यथाकथाचहस्ताभ्यां णयतौ इति सूत्रं व्याख्यात।
5) शून्यम्, शुन्यम् इति रूपद्वयं साधयत।
6) षण्मास्यः, षाण्मास्यः, षाण्मासिकः इति रूपाणि साधयत।
7) द्वित्रिचतुर्भ्यः सुच् इति सूत्रं व्याख्यात।

C) **यथेच्छं प्रश्नत्रयम् समाधत्त।** **5x3=15**

1) तेन तुल्यं क्रिया चेद्वतिः इति सूत्रं व्याख्यात।
2) पृथोर्भावः इत्यस्मिन् अर्थे यानि रूपाणि सम्भवन्ति तानि साधयत।
3) तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रं व्याख्यात।
4) लोमादिपामादिपिच्छादिभ्यः शनेलचः इति सूत्रं व्याख्यात।
5) नित्यवीप्सयोः इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) 'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्' इति सूत्रं व्याख्यात।
2) 'तत्र साधुः' इत्यर्थे विहितानि सूत्राणि प्रतिपादयत।

***

RKMVERI/DSP/MAIS/18-23/J2021/SK-221

# SK-221 भ्वादिप्रकरणम्

कालावधिः- होराद्वयम् पूर्णाङ्कः:- 50

---

A) **यथेष्ठं दशप्रश्नाः समाधेयाः।** **1x10=10**

1) कस्य लकारस्य छन्दोमात्रविषयतत्वम्?
2) लिटस्तिवादीनां णलाद्यादेशविधायकं सूत्रं किम्?
3) लादेशा: कां संज्ञां प्राप्नुवन्ति?
4) उदित्धातुभ्य: इडागमविकल्प: केन सूत्रेण?
5) 'आनर्द' इत्यत्र नुडागम: केन सूत्रेण भवति?
6) 'टुनदि' धातो: लट्लकारस्य प्रथमपुरुषेकवचने किं रूपम्?
7) 'अष्टा' इति रूपे धातुलकारो लिखत।
8) गङ्गा विसेधति इत्यत्र षत्वनिषेधकं सूत्रं किम्?
9) 'एधिताध्वे' इत्यत्र तास्प्रत्ययस्य सकारलोप: केन सूत्रेण भवति?
10) 'कमु' धातो: स्वार्थे णिङ् प्रत्यय: केन सूत्रेण भवति?
11) द्विर्वचनेऽचि सूत्रस्य अर्थं लिखत।
12) अत एकहल्मध्येऽनादेशादेर्लिटि इत्यत्र एकहल्मध्ये इत्यस्य विग्रहं लिखत।

B) **यथेष्ठं पञ्च समाधत्त।** **3x5=15**

1) 'ऐधिषत' इति रूपं साधयत।
2) लिङ् लकारस्य प्रयोग: केषु-केषु अर्थेषु भवति?
3) लिट् लकारस्य द्वित्वव्यवस्थां निरूपयत।
4) आतीत् इति रूपं साधयत।
5) 'पिप्ये' इति रूपं साधयत।
6) 'गोपायाञ्चकार' इत्यस्य रूपसिध्दिं वर्णयत।
7) सायात् इति रूपं साधयत।

C) **यथेष्ठं प्रश्नत्रयं समाधत्त।** **5x3=15**

1) संहितैकपदे नित्या.......इति कारिकां पूरयित्वा कारिकार्थं व्याख्यायताम्।
2) एकाच उपदेशेऽनुदात्तात् इति सूत्रं व्याख्यायताम्।
3) लः कर्मणि च भावे चाऽकर्मकेभ्य इति सूत्रं व्याख्यायताम्।
4) उवोख, ऊखतुः, ऊखुः रूपाणि साधयत।
5) 'कृपो रो लः' इति सूत्रं व्याख्यायताम्।

D) **अन्यतरं समाधत्त।** **10x1=10**

1) ग्रन्थोक्तदिशा क्रादिनियमं वर्णयत।
2) अचीकमत् इति रूपं साधयित्वा सन्वल्लघुनि चङ् परेऽनग्लोपे सूत्रं व्याख्यायताम्।

***

RKMVERI/DSP/MAIS/18-23/J2021/SK-223

# SK-223 सि.कौ.अदादितः चुरादिपर्यन्तम्

कालः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **अधोलिखितेषु दश समाधेयाः** **1x10=10**

1) जक्षतुः इत्यत्रोपधाया लोपः केन सूत्रेण?
2) आदत् इत्यत्राडागमः केन सूत्रेण? सूत्रस्यार्थः कः?
3) हन्धातोः लोटि सिपि किं रूपम्?
4) शेते इत्यत्र केन सूत्रेण गुणः भवति?
5) यौति इत्यत्र उकारान्तस्य वृद्धिः केन सूत्रेण भवति?
6) स्तः इत्यत्र अकारलोपः कथम्?
7) जुहोत्यादिगणे शपः का गतिर्भवति? तद्विधायकं सूत्रं किम्?
8) ञिभी धातोः लटि बिभितः, बिभीतः इति विकल्पः कथम्?
9) हेयात् इत्यत्र एत्त्वं कथम्?
10) श्यति इत्यत्र ओकारस्य लोपविधायकं सूत्रं किम्?
11) जायते इत्यत्र जन् इत्यस्य जादेशविधायकं सूत्रं किम्?
12) विभाषा चेः इति सूत्रस्यार्थं लिखत।
13) भृज्जति इत्यत्र सम्प्रसारणविधायकं सूत्रं लिखत?

B) **एतेषु पञ्च रूपाणि साधयत** **3x5=15**

1) अवधीत्
2) अधुक्षत्
3) आत्थ
4) शेरते
5) एधि
6) जहिहि
7) अरुणत्

C) **यथेष्टं त्रीणि रूपाणि साधयत** **5x3=15**

1) ऊर्णुनविथ
2) ददरिद्रौ
3) पप्रतुः
4) ममङ्क्थ
5) अभीयात्

D) **यथेष्टम् एकस्य उत्तरं लेख्यम्** **10x1=10**

1) अजागरीत् इति रूपं साधयत।
2) अचूचुरत् इति रूपं साधयत।

***

RKMVERI/DSP/MAIS/17-22/J2021/SK-225

# SK-225 सिद्धान्तकौमुद्यां सन्नन्तात् लकारार्थप्रकरणं यावत्

समयः होराद्वयम् पूर्णाङ्कः 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) धातोः कर्मणः इति सूत्रे धातुग्रहणं किमर्थम् ?
2) मुचोऽकर्मकस्य गुणो वा इत्यस्य उदाहरणं किम् ?
3) क्रियासमभिहारः नाम किम् ?
4) गत्यर्थकधातुभ्यः कस्मिन्नर्थे यङ् ?
5) सुपः आत्मनः क्यचित्यस्य कोऽर्थः ?
6) क्यचि च इत्यस्य कोर्थ:।
7) काम्यच्च इति सूत्रस्य किमुदाहरणम्।
8) कर्मवत् कर्मणा तुल्यक्रिय: इति सूत्रस्यार्थं लिखत।
9) रलो व्युपधाद्धलादे: इति सूत्रे रल: इति किमर्थम्।
10) अज्झनगमां सनि इति सूत्रेण किं विधीयते।
11) स्मिपूङ्रञ्ज्वशां सनि इति सूत्रेण किं विधीयते।
12) वाव्रज्यते इत्यत्र कस्मिन्नर्थे यङ्।

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) बोभूयते इति रूपं साधय।
2) स्वपिस्यमिव्येञां यङि इति सूत्रं व्याख्यात।
3) वेवीयते इति रूपं साधय।
4) देध्मीयते इति रूपं साधय।
5) चिकीर्षति इति रूपं साधय।
6) तोतोर्ति इति रूपं साधय।
7) तृतिक्षति इति रूपं साधय।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) बुभूषति इति रूपं साधयत।
2) नुगतोऽनुनासिकान्तस्य इति सूत्रं व्याख्यात।
3) वाव्रज्यते इति रूपं साधयत।
4) पुत्रीयति इति रूपं साधयत।
5) धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) धातोः कर्मणः समानकर्तृकादिच्छायां वा। सोदाहरणं विवृणुत।
2) कर्मवत्कर्मणा तुल्यक्रियः। सोदाहरणं विवृणुत।

***

# SK-228 सिद्धान्तकौमुद्याम् उत्तरकृदन्तप्रकरणम्

कालावधिः- होराद्वयम् पूर्णाङ्काः- 50

---

A) **यथेच्छं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) ताभ्यामन्यत्रोणादयः इति सूत्रे ताभ्यामिति किमर्थम्?
2) भूतानि कालः पचतीति वार्ता इत्यत्र तुमुन् कुतो न?
3) वर्षम् इत्यत्र कः प्रत्ययः केन च विधीयते?
4) प्रघणः कः?
5) चिकीर्षा इत्यत्र कः प्रत्ययः, केन च विधीयते?
6) संस्तावो नाम किम्?
7) अवस्था इत्यत्र क्तिन् कुतो न?
8) उद्घनशब्दस्य कोऽर्थः?
9) समजशब्दस्य कोऽर्थः?
10) आहवः इत्यस्य विग्रहः कः?
11) प्रसरः इत्यत्र कः प्रत्ययः, केन च विधीयते?
12) समासेऽनञ्पूर्वे क्त्वो ल्यप् इत्यत्र अनञ् इति कीदृक् प्रतिषेधः?

B) **यथाकामं पञ्च समाधत्त।** **3x5=15**

1) संज्ञासु धातुरूपाणि इति श्लोकं व्याख्यात।
2) द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम् इति वार्तिकं व्याख्यात।
3) कथं तर्हि अतिसुलभमतिदुर्लभमिति?
4) ड्वितः क्त्रिः इति सूत्रं व्याख्यात।
5) व्यावक्रोशी इति रूपं साधयत।
6) हस्तादाने चेरस्तेये इति सूत्रं व्याख्यात।
7) निवासचितिशरीरोपसमाधानेष्वादेश्च कः इत्यत्र आदेरित्युक्तिः किमर्था?

C) **यथाकामं त्रीन् समाधत्त।** **5x3=15**

1) परिमाणाख्यायां सर्वेभ्यः इति सूत्रं व्याख्यात।

2) स्त्रियां क्तिन् इति सवार्तिकं व्याख्यात।

3) क्यप्प्रत्ययविधायकानि सूत्राणि लिखत।

4) समानकर्तृकयोः पूर्वकाले इति सूत्रं व्याख्यात।

5) ल्यबाश्रितकार्याणि व्याख्यात।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) तुमुन्प्रत्ययविधायकानि सूत्राणि लिखत।

2) खल्प्रत्ययविधायकानि सूत्राणि लिखत।

***

**SK-237 लघुसिद्धान्तकौमुद्याम् अजन्तस्त्रीतः अव्ययप्रकरणं यावत् स्त्रीप्रत्ययाश्च।**

समयः होराद्वयम् पूर्णाङ्कः 50

---

A) **यथाकामं दश प्रश्नान् उत्तरत।** **1x10=10**

1) तिसृणाम् इति रूपे ऋकारस्य दीर्घादेशनिषेधः केन सूत्रेण भवति।
2) सर्वस्यै इति रूपे स्याडागमः केन सूत्रेण।
3) शि इत्यस्य का संज्ञा।
4) विभाषा ङिश्योः इति सूत्रवृत्तिं लिखत।
5) अनाप्यकः इति सूत्रे आप् इति पदेन कस्य ग्रहणं भवति।
6) अन्वादेशो नाम किम्।
7) त्यद् इति शब्दस्य स्य इति रूपे सकारादेशः केन सूत्रेण भवति।
8) बहुवचनस्य वस्नसौ इति सूत्रं कस्य अपवादम् भवति।
9) महान् इति रूपे दीर्घः केन सूत्रेण भवति।
10) त्यदादिषु दृशोऽनालोचने कञ्च इति सूत्रे चकारेण कस्य ग्रहणम्।
11) अद्भिः इति रूपे अपः तकादेशः केन सूत्रेण।
12) इयम् इति रूपे यकारादेशः केन सूत्रेण।

B) **यथारुचि पञ्च समाधेयाः।** **3x5=15**

1) वारि इति रूपं साधयत।
2) अहम् इति रूपं साधयत।
3) पिपठीः इति रूपं साधयत।
4) अयम् इति रूपं साधयत।
5) अचो रहाभ्यां द्वे इति सूत्रं व्याख्यात।
6) हो ढः इति सूत्रं व्याख्यात।
7) ङेप्रथमयोरम् इति सूत्रं व्याख्यात।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) उगिदचां सर्वनामस्थानेऽधातोः इति सूत्रं व्याख्यात।
2) ङिति ह्रस्वश्च इति सूत्रं व्याख्यात।
3) अल्लोपोऽनः इति सूत्रं व्याख्यात।
4) आत्वसन्तस्य चाधातोः इति सूत्रं व्याख्यात।
5) अदसोऽसेर्दादु दो मः इति सूत्रं व्याख्यात।

D) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) युष्मत्शब्दस्य रूपाणां सिद्धये प्रयुक्तानि सूत्राणि आलोचयन्तु।
2) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/20-25/J2021/SK-238

# SK-238 ल.सि.कौ.तिङन्तप्रकरणम्

समयः होराद्वयम् पूर्णाङ्कः 50

---

A) **दश प्रश्नाः समाधेयाः** **1x10=10**

1) सार्वधातुकसंज्ञाविधायकं सूत्रं किम्?
2) अभ्याससंज्ञाविधायकं सूत्रं किम्?
3) असेधीत् इत्यत्र ईट्-आगमः केन सूत्रेण?
4) घ्नन्ति इत्यत्र हकारस्य घकारः केन सूत्रेण?
5) सन्ति इत्यत्र अकारस्य लोपः केन सूत्रेण?
6) ऊर्णुनाव इति कस्य धातोः कस्य लकारस्य कस्मिन् पुरुषे कस्मिन् वचने रूपम्?
7) जुह्वति इत्यत्र झस्य अत् केन सूत्रेण?
8) जुहवाञ्चकार इत्यत्र केन सूत्रेण आम्?
9) दिवादिगणीयधातुभ्यः कः विकरणः भवति?
10) विध्यति इत्यत्र केन सूत्रेण सम्प्रसारणम्?
11) रुधादिगणीयधातुभ्यः कः विकरणः भवति?
12) गृह्णाति इत्यत्र कः धातुः कः विकरणः?

B) **पञ्च रूपाणां प्रक्रियासोपानानि ससूत्रं लेख्यानि** **3x5=15**

1) भवेत्
2) गोपायाञ्चकर्थ
3) एधेते
4) एधिषीष्ट
5) इयाज
6) अचीकमत
7) अजनि

C) **एतेषु त्रयाणां रूपाणां सिद्धिप्रक्रिया लेख्या** **5x3=15**

1) एधि
2) जुहुधि
3) देहि
4) स्रष्टा
5) ममङ्क्थ
6) चोरयति

D) **एकस्य उत्तरं देयम्** **10x1=10**

1) यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रं व्याख्यात।
2) सिचि वृद्धिं वर्णयत।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-243

# SK-243 महाभाष्ये ८,९ आह्निके

समयः होराद्वयम् पूर्णाङ्कः 50

## A) **यथेष्टं दशप्रश्नाः समाधेयाः।** **1x10=10**

1) स्थानिवदादेशोऽनल्विधौ इति सूत्रे वत्करणं किमर्थम्?
2) स्थानिवत्सूत्रस्य संज्ञाधिकारत्वे को दोष:?
3) स्थानिवत्सूत्रे आदेशग्रहणं किमर्थम्?
4) विधिग्रहणस्य असाधारणं प्रयोजनं लिखत।
5) अग्रहीत् सिचो लोप: कुत: न प्राप्नोति?
6) उभयी इत्यत्र कथं ङीप् सिध्यति।
7) अच: परस्मिन् सूत्रे अज्ग्रहणस्य असाधारणं उदाहरणं किम्।
8) अच: परस्मिन् सूत्रे परस्मिन् ग्रहणस्य असाधारणं उदाहरणं लिखत।
9) स्वविधौ स्थानिवद्भावस्य प्रयोजनानि लिखत।
10) स्तोस्याम्यहम्.......संस्यते ध्वंस्यते च इति कारिकां लिखत।
11) वाचिक: कस्मिन् पक्षे न सिध्यति भावसाधने उत कर्मसाधने।
12) षडिक: कस्मिन् पक्षे न सिध्यति भावसाधने उत कर्मसाधने।

## B) **यथेष्टं पञ्च समाधत्त।** **3x5=15**

1) आदेश: स्थानिवद् भवति अयम् अंशो ज्ञापकेन कथं सिध्यति?
2) अल्विधौ स्थानिवद्भावो न भवति इति केन ज्ञाप्यते यथाभाष्यं लिखत।
3) तस्य दोषस्तयादेश उभयप्रतिषेध: वार्तिकं निरूपयत।
4) अपरविधाविति तु वक्तव्यं इत्यस्य उदाहरणानि लिखत।
5) आरभ्यमाणे ...... इति वार्तिकं विलिख्य व्याख्यात।
6) चङ् परनिर्ह्रासे चोपसंख्यानं कर्तव्यं इति वार्तिकं व्याख्यात।
7) द्विर्वचनेऽचि इति सूत्रे अजग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य इति वार्तिकं व्याख्यात।

C) **यथेष्टं प्रश्नत्रयं समाधत्त।** **5x3=15**

1) क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् इति वार्तिकं सोदाहरणं व्याख्यात।
2) स्थानिवत्सूत्रे विधिग्रहणस्य प्रयोजनं यथाभाष्यं लिखत।
3) अच: परस्मिन् विधिग्रहणस्य प्रयोजनं यथाभाष्यं लिखत।
4) हलचोरादेश: स्थानिवद् भवति उत न यथाग्रन्थं लिखत।
5) अनन्तरस्य विधिं प्रति स्थानिवद्भावो भवति उत पूर्वमात्रस्य यथाभाष्यं लिखत।
6) अदर्शनं लोप: सूत्रं यथाभाष्यं व्याख्यात।

D) **अन्यतरं समाधत्त।** **10x1=10**

1) अच: परस्मिन् सूत्रस्य दलसार्थक्यं लिखत।
2) न पदान्त इत्यस्य भावसाधन-कर्मसाधनपक्षद्वयं यथाग्रन्थं प्रतिपाद्यताम्।

***

RKMVERI/DSP/MAIS/17-22/J2021/SK-257

# SK-257 परिभाषेन्दुशेखरे एकपञ्चाशत्तः आन्तं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) कैयटमते आगमादेशयो: बाध्यबाधकभाव: कथं न भवति?
2) प्राचां मते वार्णादाङ्गं बलीयो भवतीति परिभाषाया: ज्ञापकं किम्?
3) विभक्तौ लिङ्गविशिष्टाग्रहणम् एषा परिभाषा कुत्र स्पष्टा अस्ति?
4) सन्निपातलक्षणः..." इति परिभाषायां सन्निपातशब्देन किं ग्राह्यते?
5) अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते अस्यां परिभाषायां ज्ञापकं किम्?
6) लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य इति परिभाषायाः नागेशानुगुणं ज्ञापकं किम्?
7) प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम् इति परिभाषा कस्य सूत्रस्य भाष्ये पठिता?
8) किं नाम कारकविभक्तित्वम्?
9) नञ्घटितमनित्यम् अस्याः परिभाषायाः फलं किमस्ति?
10) गर्गा: शतं दण्ड्यन्ताम् इत्यत्र प्रत्येकमुत समुदाये वाक्यपरिसमाप्ति: भवति?
11) ज्ञापकसिद्धं न सर्वत्र अस्याः परिभाषायाः अर्थः कः अस्ति?
12) अकृतव्यूहाः पाणिनीयाः इति परिभाषायाम् अकृतव्यूहपदस्य कोऽर्थः?

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) नाजानन्तर्ये बहिष्ट्वप्रक्लृप्ति: इति परिभाषा कथं ज्ञापिता?
2) नञिवयुक्तन्यायस्य कथम् अनित्यत्वं नास्ति इति प्रतिपादयत।
3) "नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे"अस्याः परिभाषायाः वर्णनं कुर्वन्तु।
4) "लक्षणप्रतिपदोक्तयोः..." इति परिभाषा कथं सिद्ध्यति?
5) प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः इति परिभाषां व्याख्यात।
6) प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम् इति परिभाषा कथं प्रत्याख्याता।
7) पदगौरवाद्योगविभागो गरियान् इति परिभाषां व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) "पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते ,नोत्तरान्" अस्याः परिभाषायाः व्याख्यानं कुर्वन्तु।

2) 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इमां परिभाषां प्रपञ्चयतु।

3) श्रुतानुमितयोः श्रुतसम्बन्धो बलवान् अस्याः परिभाषायाः व्याख्या विधेया।

4) विधौ परिभाषोपतिष्ठते नानुवादे अस्याः व्याख्यानं कुर्वन्तु।

5) गामादाग्रहणेष्वविशेषः इति इमां परिभाषां प्रपञ्चयतु।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) 'अङ्गवृत्ते पुनर्वृत्तावविधिः 'इति परिभाषां व्याख्यात।

2) 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति परिभाषां व्याखात।

***

## SK-266 लघुशब्देन्दुशेखरे अजन्तान्तभागः

समयः- होराद्वयम् पूर्णाङ्कः - ५०

---

A) **यथेष्टं दशप्रश्नाः समाधेयाः।** **1x10=10**

1) न हि लोके केवलेन प्रत्ययेनार्थो गम्यते इति क्व भाष्ये उक्तम् ?
2) अर्थवद् पदस्य व्यावृत्तयः किम्?
3) शशशृङ्गादि पदानां प्रातिपदिकसंज्ञा केन सूत्रेण भवति?
4) प्रकृतित्वम् किम्?
5) परिनिष्ठितत्वं नाम किम् ?
6) सौवरीणा सप्तमीनां कृते का सप्तमी उक्ता?
7) कुण्डोध्नी इत्यत्र कथं कप् परिहृत:?
8) द्व्येकयो: इत्यस्य सङ्ख्येयपरत्वे को दोष:?
9) तन्त्रं नाम किम्?
10) एकशेष: कस्य अपवाद:?
11) थमोर्मकारेण भाष्यमते किं ज्ञाप्यते?
12) अनुबन्धत्वं नागेशमते किम्?

B) **यथेष्टं पञ्च समाधत्त।** **3x5=15**

1) अर्थवद् इत्यस्य परिष्कारं विलिख्य दलसार्थक्यं च लिखत।
2) परश्च इति सूत्रं व्याख्यात।
3) ङ्याप्रातिपदिकात् इत्यत्र प्रातिपदिकग्रहणप्रयोजनं किम्?
4) बहुषु बहुवचनम् इति सूत्रं व्याख्यात।
5) बहुवचने झल्येत् इति सूत्रं व्याख्यात।
6) एकवचनं सम्बुद्धि: इति सूत्रं व्याख्यात।
7) औङ आप: इति सूत्रं व्याख्यात।

C) **यथेष्टं प्रश्नत्रयं समाधत्त।** **5x3=15**

1) यस्मात् प्रत्ययविधि: इति सूत्रं व्याख्यात।
2) एङ्ह्रस्वात् इति सूत्रं व्याख्यात।
3) उभशब्दपाठं यथाग्रन्थं निरूपयत।
4) कृत्तद्धित इति सूत्रं व्याख्यात।
5) अट्कुप्वाङ् इति सूत्रं व्याख्यात।

D) **अन्यतरं समाधत्त।** **10x1=10**

1) जराया: जरसन्यतरस्याम् इति सूत्रं व्याख्यात।
2) 'नामि' इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-268

# SK-268 लघुशब्देन्दुशेखरे स्त्रीप्रत्ययाव्ययीभावप्रकरणे

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) कुम्भकारी इत्यत्र कः स्त्रीप्रत्ययः ?
2) शूद्रा चामहत्पूर्वा जातिः इति कस्यापवादः?
3) चटका इत्यत्र इत्त्वं कुतो न?
4) पञ्चसुत्वरी इत्यस्य विग्रहः कः?
5) अनो बहुव्रीहेः इत्यनेन किं विधीयते?
6) लिङ्गानां शास्त्रीयं लक्षणं किम्?
7) लिङ्गानां लौकिकं लक्षणं किम्?
8) गुणस्य लक्षणं किम्?
9) टिड्ढाणञिति सूत्रे ठक्ठञोरुपादानं किमर्थम्?
10) शर्वरी इत्यत्र कः कृत्प्रत्ययः?
11) चौरी इत्यस्य कः विग्रहः?
12) यञश्च इति योगविभागः किमर्थः?

B) **अधोलिखितेषु यथारुचि पञ्च समाधत्त।** **3x5=15**

1) अजाद्यतष्टाप् इति सूत्रस्य व्याख्यां कुर्वन्तु।
2) सह सुपा इति सूत्रस्य व्याख्यां कुरुत।
3) आकृतिग्रहणा जातिः इति जातिलक्षणं व्याख्यात।
4) वोतो गुणवचनात् इति सूत्रं व्याख्यात।
5) समासान्तः कस्य अवयवो भवतीति प्रतिपादयत।
6) डाबुभाभ्यामन्यतरस्याम् इति सूत्रस्य व्याख्या कार्या।
7) वनो र च इति सूत्रं सोदाहरणं वर्णयत।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) उगितश्च इति सूत्रस्य व्याख्यां कुरुत।
2) प्रत्ययस्थादिति सूत्रे कात् इत्यनेन किं विवक्षितमिति वर्णयत।
3) उदीचामातः स्थाने यकपूर्वायाः इति सूत्रस्य व्याख्या कार्या।
4) स्वाङ्गलक्षणं यथाग्रन्थं प्रतिपादयन्तु।
5) वक्ष्यमाणा इत्यत्र कुतो न ङीप् इति यथाग्रन्थं प्रतिपादयत।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) समर्थः पदविधिः इति सूत्रस्य व्याख्यां कुर्वन्तु।
2) अनुपसर्जनात् इति सूत्रस्य सार्थक्यं यथाग्रन्थं प्रतिपादयत।

***

RKMVERI/DSP/MAIS/17-22/J2021/SK-271

# SK-271 वैयाकरणभूषणसारे आदितो नामार्थप्रकरणं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) फलं कस्य विशेषणम् ?
2) चतुर्थीविभक्तेः अर्थः कः?
3) अवधिः कस्य अर्थः?
4) जातिः नामार्थः इति कस्य मतम् ?
5) लङर्थः कः?
6) पञ्चमः लकारः कः?
7) व्यक्तिः नामार्थः इति कस्य मतम् ?
8) असमस्तनञः कुत्रान्वयः ?
9) मीमांसकतमते धात्वर्थः कः ?
10) कृञः यत्नमात्रार्थकत्वे कः दोषः?
11) नपुंसकत्वं किम् ?
12) षोढा प्रातिपदिकार्थः इति कस्य मतम् ?

B) **अधोलिखितेषु यथारुचि पञ्च समाधत्त।** **3x5=15**

1) कर्तृतृतीयाया आश्रयोऽर्थः इति यथाशास्त्रं प्रतिपादयत।
2) लिडर्थं यथाग्रन्थं वर्णयन्तु।
3) तिङर्थकालस्य कुत्रान्वय इति यथाशास्त्रं प्रकाशयत।
4) सम्बोधनान्तस्य कुत्रान्वय इति यथाग्रन्थं प्रकाशयन्तु।
5) लडर्थं यथाग्रन्थं प्रतिपादयत।
6) सकर्मकाकर्मकयोः लक्षणं प्रतिपादयन्तु।
7) फलस्य स्वरूपं वर्णयन्तु।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) व्यापारस्य स्वरूपं प्रकाशयन्तु।

2) तिङर्थसंख्यायाः कुत्रान्वय इति यथाशास्त्रं प्रतिपादयत।

3) ग्रामो गम्यते इत्यादिप्रयोगः कथं नेति प्रकाशयन्तु।

4) पाकः इत्यादौ असत्त्वभूतक्रियायाः प्रतीतिः भवति नवेति यथाशास्त्रं वर्णयत।

5) विधिवादं यथाग्रन्थं प्रकाशयन्तु।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) आख्यातार्थं यथाग्रन्थं प्रतिपादयन्तु।

2) द्वितीयार्थं यथाग्रन्थं व्यासेन वर्णयत।

***

RKMVERI/DSP/MAIS/16-21/J2021/SK-286

## SK-286 काशिका प्रथमाध्यायस्य प्रथमपादः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) अथ किमर्थो वर्णानामुपदेशः ?
2) निपात एकाजनाङ् इत्यत्र एकाजिति किम् ?
3) अदसो मात् इति सूत्रस्य अर्थः कः?
4) कः अकारः ङित् कश्च अङित् ?
5) प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ?
6) अथ किमर्थमुपदिष्टोऽपि हकारः पुनरुपदिश्यते ?
7) आद्यन्तवदेकस्मिन् इत्यतिदेशः किमर्थमारभ्यते ?
8) ष्णान्ता षटित्यत्र संख्येति कथं सम्बध्यते ?
9) न धातुलोप आर्धधातुके इत्यस्य अर्थः कः ?
10) किमर्थं न बहुव्रीहौ इति प्रतिषेध आरभ्यते ?
11) अव्ययीभावसमास्य अव्ययसंज्ञायाः किं प्रयोजनम् ?
12) किमर्थं स्थानिवदादेशः आरभ्यते स्थान्यादेशयोः ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अइउण्। टिप्पणीं लिखत।
2) अदेङ् गुणः।टिप्पणीं लिखत।
3) ओत्।टिप्पणीं लिखत।
4) ऊँ।टिप्पणीं लिखत।
5) तरप्तमपौ घः।टिप्पणीं लिखत।
6) डति च।टिप्पणीं लिखत।
7) **द्वन्द्वे च। टिप्पणीं लिखत।**

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) ऋलृक्। व्याख्यात।

2) मुखनासिकावचनोऽनुनासिकः। व्याख्यात।

3) ईदूदेद्द्विवचनं प्रगृह्यम्। व्याख्यात।

4) न बहुव्रीहौ। व्याख्यात।

5) तद्धितश्चासर्वविभक्तिः। व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) इको गुणवृद्धी। सोदाहरणं वर्णयत।

2) ईदूतौ च सप्तम्यर्थे। सोदाहरणं विवृणुत।

***

# SK-301 सूक्तं निरुक्तं च

कालावधिः- होराद्वयम् पूर्णाङ्कः- 50

---

## निरुक्तप्रश्नाः

A) **एकेन वाक्येन पदेन वा उत्तरत।** **1x11=11**

1) लोके व्यवहाराय शब्देन संज्ञाकरणं कुतः?
2) सम् इत्युपसर्गस्य कोऽर्थः?
3) निपातस्य निर्वचनं कथम्?
4) न इति निपातः कदा उपमार्थे भवति?
5) को भारहारः स्थाणुः?
6) सर्वविद्यः ऋत्विक् कः?
7) के ब्राह्मणेन रूपसम्पन्ना विधीयन्ते?
8) किं सन्तमर्थम् आययति?
9) अदः इति केषाम् उपदेशः?
10) वेदे कर्मसम्पत्तिः कः?
11) अति-सु इत्यनयोः कोऽर्थः?
12) सीमापदस्य निर्वचनं कथम्?
13) स्वाङ्गाभ्युच्चयस्य किमुदाहरणम्?

B) **त्रीणि विवृणुत।** **3x3=9**

1) निघण्टुशब्दार्थं स्पष्टयत।
2) निरुक्तस्य आवश्यकतां समासेन निरूपयत।
3) षड् भावविकारान् समासेन परिचाययत।
4) दशानामुपसर्गाणाम् अर्थान् निर्दिशत।
5) चत्वारि पदजातानि समासेन परिचाययत।

## ऋक्सूक्तानिप्रश्नाः

C) **अधोलिखितेषु पञ्चानां पदानां विषये टिप्पणी लेख्या** **2x5=10**

1) रत्नधातमम्
2) तुविबाधम्
3) पत्सुतःशीः
4) नीचावयाः
5) स्वधया
6) सलिलम्
7) रेतोधाः

D) **द्वयोः मन्त्रयोः व्याख्यानं कार्यम्** **5x2=10**

1) अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत्॥५॥
2) उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥७॥
3) अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष। वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः॥२॥
4) अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान। वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः॥७॥
5) इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न। यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद॥७॥

E) **यथेष्टं एकस्य उत्तरं लिखत।** **10x1=10**

1) वाक्सूक्तस्य सारं स्वभाषया लिखत।
2) न मृत्युरासीद्, तम आसीत्तमसा इत्यादिमन्त्रद्वयं सायणभाष्यानुसारं व्याख्यात।

***

# SK-315 Linguistics

कालावधिः - होराद्वयम्  पूर्णाङ्काः - 50

---

A) **Answer the following questions- (any ten)  1x10=10**

1) What are the methods of Linguistics?
2) How do you classify the consonants of a language?
3) How many short simple vowels were there in the Proto Indo-European?
4) Define Ablaut.
5) What is Analogy?
6) Give an example of Infix Agglutinating language.
7) What do you mean by regional dialect?
8) What is duality?
9) Give an example of central vowel.
10) How many sibilant/s was/were there in the Parent tongue?
11) Give an example of Compensatory Lengthening in Sanskrit.
12) IE *ḱm̥tom > Goth. hund—it is an example of which phonetic law?
13) What do you mean by transference of meaning?
14) What is the difference between a Phoneme and a Morpheme?
15) Define Cardinal vowels.

B) **Distinguish between (any five)  3x5=15**

1) Syllabic and non-Syllabic Consonants
2) Plosives and Fricatives
3) Elevation and Degeneration of meaning
4) Portmanteau and Hybrid word
5) Incorporating and Agglutinating type of language
6) Syncope and Syllabic Syncope

7) Free Variation and Complementary Distribution

8) Hiatus and Diphthongization

C) **Write short notes on any three of the following** **5x3=15**

1) Aryan law of Palatalization

2) Treatment of Proto Indo-European Syllabic Nasals and Short Diphthongs in Sanskrit

3) Quantitative Ablaut of Sanskrit

4) Sources of Sanskrit simple long vowels

5) Classification of Sanskrit Vowels

D) **Write an essay of the following -** **10x1=10**

1) How do you classify the languages of the world? Discuss them in brief.

2) What is Phonetic Law. Discuss Grimm's Law.

3) Show the development of Proto Indo-European Palatal, Velar and Labio-Velar Guttural consonants in Sanskrit. Give suitable examples.

***

RKMVERI/DSP/MAIS/17-22/J2021/SK-315

# SK-315 ভাষাতত্ত্বম্

সময় – ২ ঘন্টা　　　　　　　　　　　　　　　　　　পূর্ণাঙ্ক – ৫০

---

Bengali Version

**A) নিম্নলিখিত প্রশ্নগুলির উত্তর দাও (যে কোনো দশটি)　　　১ x ১০=১০**

1) ভাষাবিজ্ঞানের পদ্ধতিগুলি কী কী?
2) কোনো ভাষার ব্যঞ্জনধ্বনিগুলিকে তুমি কিভাবে শ্রেণীকরণ কর?
3) প্রত্ন ইন্দো-ইউরোপীয় ভাষায় ক’টি একক হ্রস্ব স্বর ছিল?
4) অপশ্রুতি কাকে বলে?
5) সাদৃশ্য কী?
6) একটি অন্তঃ-সর্গ যৌগিক সমবায়ী ভাষার উদাহরণ দাও।
7) আঞ্চলিক উপভাষা বলতে কী বোঝ?
8) ভাষার দ্বিস্তর কী?
9) কেন্দ্রীয় স্বরের একটি উদাহরণ দাও।
10) প্রত্ন ভাষায় ক’টি শিস ধ্বনি ছিল?
11) সংস্কৃত ভাষা থেকে ক্ষতিপূরক দীর্ঘীভবনের একটি উদাহরণ দাও।
12) ই.ইউ. ** ḱm̥tom > Goth. hund* -এটি কোন্ ধ্বনিসূত্রের উদাহরণ?
13) অর্থসংক্রমণ বলতে কী বোঝ?
14) স্বনিম ও রূপিম এর মধ্যে কী পার্থক্য আছে?
15) মৌলিক স্বরধ্বনি কাকে বলে?

**B) পার্থক্য কর - (যে কোনো পাঁচটি)　　　　　　　　　৩ x ৫=১৫**

1) আক্ষরিক এবং অনাক্ষরিক ব্যঞ্জনবর্ণ
2) স্পর্শ বর্ণ ও উষ্ম বর্ণ
3) অর্থের উন্নতি ও অবনতি
4) জোড়কলম ও সঙ্কর শব্দ
5) সর্বসমবায়ী ও যৌগিক সমবায়ী ভাষা
6) মধ্যস্বর লোপ ও মধ্যাক্ষর লোপ

7) মুক্ত বৈচিত্র্য ও প্রতিযোগী অবস্থান
8) স্বরসহবস্থান ও দ্বিস্বরীভবন

C) **নীচের যে কোনো তিনটি বিষয়ে সংক্ষিপ্ত টীকা লেখ- ৫ x ৩=১৫**

1) আর্যভাষায় তালব্যীভবনের সূত্র
2) প্রত্ন ইন্দো-ইউরোপীয় ভাষার আক্ষরিক নাসিক্য ব্যঞ্জনধ্বনি ও হ্রস্ব দ্বিস্বরগুলির সংস্কৃত ভাষায় রূপান্তর দেখাও।
3) সংস্কৃত ভাষায় পরিমাণগত অপশ্রুতি
4) সংস্কৃত ভাষার একক দীর্ঘ স্বরধ্বনিগুলির উৎস
5) সংস্কৃত স্বরধ্বনিগুলির শ্রেণীকরণ

D) **নীচের যে কোনো একটি বিষয়ে প্রবন্ধ লেখ- ১০ x ১=১০**

1) পৃথিবীর ভাষাগুলিকে তুমি কিভাবে শ্রেণীকরণ করবে? সংক্ষেপে আলোচনা কর।
2) ধ্বনিসূত্র কাকে বলে? গ্রীমের ধ্বনিসূত্র আলোচনা কর।
3) প্রত্ন ইন্দো-ইউরোপীয় ভাষার তালব্য, কণ্ঠ্য ও কণ্ঠ্যৌষ্ঠ্য ধ্বনিগুলির সংস্কৃত ভাষায় রূপান্তর দেখাও। উপযুক্ত উদাহরণ দাও।

***

RKMVERI/DSP/MAIS/18-23/J2021/SK-331

# SK-331 सांख्ययोगौ

समयः- होराद्वयम् पूर्णाङ्कः - 50

---

A) **एकेन वाक्येन पदेन वा उत्तरत।** **1x10=10**

1) प्रधानाः चित्तवृत्तयः कति?
2) मूलप्रकृतेः अपरं नाम किम्?
3) योगपदस्य कोऽर्थः?
4) कति चित्तभूमयः?
5) केषां मते कार्यम् असत्?
6) दुःखत्रयं किम्?
7) कदा द्रष्टुः स्वरूपे अवस्थानम्?
8) अभ्यासः वैराग्यं च कस्य उपायौ?
9) आसुरिः कः?
10) योगे कति प्रमाणानि?
11) प्रणवस्य वाच्यः कः?
12) निद्रायां मनः वर्तते न वा?

B) **पञ्च समासेन व्याख्यात।** **3x5=15**

1) तस्य वाचकः प्रणवः, व्याख्यात।
2) पूर्वपक्षरीत्या दुःखत्रयाभिघातः कथं शक्यते?
3) विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्, व्याख्यात।
4) तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्, व्याख्यात।
5) अथ योगानुशासनम्, व्याख्यात।
6) सांख्यमते प्रत्यक्षप्रमाणं निरूपयत।
7) स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः, व्याख्यात।
8) भवप्रत्ययो विदेहप्रकृतिलयानाम्, व्याख्यात।

C) **त्रीणि विशदयत।** **5x3=15**

1) योगश्चित्तवृत्तिनिरोधः, व्याख्यात।
2) योगोक्तानि प्रमाणानि प्रतिपादयत।
3) सत्कार्यवादं समासेन निरूपयत।
4) योगरीत्या निद्रावृत्तिं व्याख्यात।
5) योगोक्तां स्मृतिं निरूपयत।

D) **एकं प्रपञ्चयत।** **10x1=10**

1) क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः।
2) तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः।

***

RKMVERI/DSP/MAIS/19-24/J2021/SK-342

## SK-342 तर्कसंग्रहदीपिका

समयः होराद्वयम् पूर्णाङ्कः 50

---

A) **यथेष्टं दशप्रश्नाः समाधेयाः।** **1x10=10**

1) दीपिका व्याख्या केन लिखिता?
2) दीपिकायाः मङ्लपद्यं लिखत।
3) द्रव्यलक्षणं लिखत।
4) कर्मलक्षणं लिखत।
5) आपः लक्षणं लिखत।
6) आकाशस्य लक्षणं लिखत।
7) इन्द्रियस्य लक्षणं लिखत।
8) गुरुत्वं निरूपयत।
9) सन्निकर्षाः के?
10) परामर्शलक्षणं किम्?
11) के पञ्चावयवाः?
12) लिङ्गं कतिविधम्?

B) **यथेष्टं पञ्च समाधत्त।** **3x5=15**

1) अव्याप्ति-अतिव्याप्ति-असम्भवानां निकृष्टलक्षणानि लिखत।
2) पृथ्वीं सलक्षणं प्रतिपादयत।
3) वायुं सलक्षणं प्रतिपादयत।
4) मनो निरूपयत।
5) यथार्थानुभवं यथाग्रन्थं व्याख्यात।
6) स्वार्थम् अनुमानं निरूपयत।
7) रूपं निरूपयत।

C) **यथेष्ठं प्रश्नत्रयं समाधत्त।** **5x3=15**

1) सप्तपदार्था: इत्यत्र सप्तग्रहणस्य प्रयोजनं किम्?
2) तमसो दशमद्रव्यत्वं खण्डयत।
3) सुवर्णस्य तेजस्त्वं निरूपयत।
4) केवलव्यतिरेकिं यथाग्रन्थं निरूपयत।
5) कारणं यथाग्रन्थं प्रतिपादयत।

D) **अन्यतरं समाधत्त।** **10x1=10**

1) आत्मानं दीपिकादिशा निरूपयत।
2) पाकं यथाग्रन्थं प्रतिपादयत।

***

RKMVERI/DSP/MAIS/18-23/J2021/SK-345

## SK-345 न्यायसिद्धान्तमुक्तावल्यामनुमानशब्दखण्डौ

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) पदं कतिविधम् ?
2) पक्षः कः?
3) अव्ययीभावे कुत्र लक्षणा?
4) बहुव्रीहौ कुत्र लक्षणा?
5) कर्मधारये लक्षणा भवति नवा?
6) द्वन्द्वे लक्षणा स्वीक्रियते नवा?
7) परामर्शस्य लक्षणं किम् ?
8) करणलक्षणं किम् ?
9) व्यापारलक्षणं किम् ?
10) सपक्षः कः?
11) रूढपदस्य उदाहरणं किम् ?
12) लक्षितलक्षणायाः उदाहरणं किम् ?

B) **अधो लिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15**

1) साध्यवत्प्रतियोगिकभेदाधिकरणनिरूपितवृत्तित्वाभाव इत्यस्य समन्वयं लिखन्तु।
2) साध्याभावाधिकरणनिरूपितवृत्तित्वाभाव इत्यस्य समन्वयप्रकारं प्रतिपादयन्तु।
3) शक्तिस्वरूपं लिखन्तु।
4) व्यवहारेण कथं शक्तिग्रहो भवतीति प्रतिपादयन्तु।
5) वाक्यशेषात्कथं शक्तिग्रहो भवतीति वर्णयत।
6) यौगिकरूढपदस्य स्वरूपं वर्णयन्तु।
7) तत्पुरुषे कुत्र लक्षणा भवतीति प्रतिपादयत।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) अनुमितिप्रक्रियां प्रतिपादयत।
2) सव्यभिचारस्य सभेदं निरूपणं कुर्वन्तु।
3) लक्षणास्वरूपं प्रतिपादयन्तु।
4) सिद्धान्तव्याप्तिलक्षणं वर्णयन्तु।
5) व्यवहारेण कथं शक्तिग्रहो भवतीति प्रतिपादयन्तु।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) पक्षतास्वरूपं यथाग्रन्थं प्रतिपादयन्तु।
2) परामर्शस्वरूपं यथाग्रन्थं प्रकाशयन्तु।

***

RKMVERI/DSP/MAIS/20-25/J2021/SK-401

# SK-401 अलंकारशास्त्रोपकण्ठं विवेकानन्दप्रणीतस्तोत्राणि च

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

## A) यथाकामं दश प्रश्नान् उत्तरत। 1x10=10

1) परमात्मा कविः इति वचने प्रमाणवाक्यं किम्।
2) वाल्मीकिकालिदासादीनां काव्यानां प्रयोजनम् अपि चतुर्वर्गः इति किमर्थम्।
3) कविः ऋषिः इति केनाभिप्रायेण उक्तम्।
4) दर्शनं नाम किम्।
5) मीमांसककृता गौणीवृत्तिः आलङ्कारिकमते कुत्र अन्तर्भवति।
6) भट्टतौतोक्तं प्रतिभालक्षणं किम्।
7) सत्काव्यस्य स्वाभाविकौ फलितांशौ कौ।
8) रीतिपदं कस्मात्धातोः व्युत्पन्नम्।
9) अभेदप्रधानो भवति कः अलंकारः।
10) प्रतिभाचक्षुः इत्यत्र समासः विग्रहवाक्यञ्च किम्।
11) लक्षणामूलध्वनिः इत्यत्र कः समासः, विग्रहश्च कः।
12) स्थायिभावाः के।

## B) यथारुचि पञ्च प्रश्नान् उत्तरत। 3x5=15

1) काव्यस्य कारणं किम्।
2) दर्शनवर्णनयोः अर्थं स्पष्टीकुरुत।
3) संकेतम् विवृणुत।
4) गङ्गायां घोषः इत्यत्र का लक्षणा। लक्षणायाः लक्षणस्य संगतिः अत्र करणीया।
5) रससूत्रस्य भावार्थं विवृणुत।
6) भामहस्य काव्यलक्षणं विवृणुत।
7) उपमालंकारं वर्णयन्तु।

C) **यथाच्छन्दं द्वौ समाधेयौ।** **5x2=10**

1) करुणरसः आनन्दरूपः कथं भवति।

2) व्यञ्जनां प्रतिपादयन्तु।

3) उत्तममध्यमकाव्ययोः स्वरूपं वर्णयन्तु।

4) वस्तुध्वनिं रसध्वनिञ्च सोदाहरणं प्रतिपादयन्तु।

D) **यथाकामं द्वौ श्लोकौ पूरयित्वा सान्वयम् अर्थं लिखन्तु।** **2.5x2=5**

1) निखिलभुवनजन्मस्थेमभङ्गप्ररोहाः.........................।

2) का त्वं शुभे शिवकरे सुखदुःखहस्ते.......................।

3) भक्तिर्भगश्च भजनं भवभेदकारि............................।

E) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) अम्बास्वरूपं वर्णयन्तु।

2) शिवस्वरूपं वर्णयन्तु।

***

RKMVERI/DSP/MAIS/20-25/J2021/SEM/SK-412

## SK-412 वेतालपञ्चविंशत्यादिभ्यश्चिता अंशाः

कालावधिः - होराद्वयम् अङ्काः - 50

---

### Part-1

A) **अत्र यथेच्छं दश समाधत्त।** **1x10=10**

1) प्रतीहारी इत्यस्य कः अर्थः?
2) उपचक्रमे इति परिचाययत।
3) त्वं भृशं मे प्रियोऽसि। (प्रयोगपरिवर्तनं कुरुत)
4) इत्यालोच्य स समुत्थाय स्नानादिकमकरोत्। (प्रयोगपरिवर्तनं कुरुत)
5) अन्नार्थी इति शब्दं परिचाययत।
6) कृच्छ्रेण इत्यस्य अर्थः कः?
7) बिभेद इति परिचाययत।
8) उदपद्यत इति परिचाययत।
9) अच्छिनत् इति परिचाययत।
10) योषितः इत्यस्य कः अर्थः?
11) प्रभो इति शब्दं परिचाययत।
